# मम पुस्तकम्

नाम - ______________________

पत्रसङ्केतः - ______________________

______________________

चलदूरवाणी-संख्या - ______________________

## वार्तालापाय

१. चित्रे प्रदर्शितस्य स्थानस्य स्वच्छतासन्दर्भे भवान् / भवती किं कथयिष्यति ?
२. भवतः / भवत्याः परिवेशे जनाः स्वच्छतायाः पालनं कथं कुर्वन्ति ?
३. स्वच्छतायाः पालनं किमर्थम् आवश्यकम् ?
४. उद्घटितानां वस्तूनां सेवनेन का हानिः भवति ?
५. भोजनात् पूर्वं हस्तयोः प्रक्षालनं किमर्थम् आवश्यकम् ?




चरणदास-मालाकारः
पङ्कजस्य चायापणः
हस्तयोः
प्रक्षालनम्

# ५ आहारः स्वास्थ्यं च

**वयं ज्ञास्यामः**

| उ | ऊ | ह | छ | थ | फ | ठ | ङ |
|---|---|---|---|---|---|---|---|

- १०० तः १००० पर्यन्तं संख्यानां परिचयम्।
- पठनं लेखनं च।
- एककानां, दशकानां शतकानां च समूहेषु गणनाम् (स्थानीय-मानानुसारेण)
- एकाङ्कीयानां सङ्ख्यानां गुणनम्।

■ **चित्रं दृष्ट्वा पठामः -**



मशकः



फलानि



स्वच्छ-हस्तौ



अवकरः




दुग्धम्



औषधम्



व्यायामः



अवकरकण्डोलः



फेनकम्

**शिक्षक-निर्देशः** - उपरि निर्दिष्टाः शब्दाः चित्राणि च आहारविषयेण स्वास्थ्यविषयेण च सम्बद्धानि सन्ति। शब्दानां पठनार्थं सहभागिनां सहयोगं कुर्वन्तु। ते शिक्षार्थिनः चित्रस्य आधारेण न केवलम् अनुमानम् अपि तु अवगतानां शब्दानां अक्षराणां च उपयोगम् अपि कुर्युः। एतदर्थं तान् प्रेरयन्तु। भोजनस्य, आरोग्यस्य, स्वच्छतायाः च विषये अपि चर्चां कुर्वन्तु।






किम्, भवान् / भवती मशकान् आमन्त्रयति ?

# सावधानम् !

मलेरिया, डेंगू, चिकनगुनिया च भवितुम् अर्हति!

परितः जलसञ्चयः न भवेत् । गर्ताः पूरिताः भवेयुः ।

जलभाण्डानि, जलसंग्राहिकां, शीतलकादीनि च स्वच्छानि स्थापयन्तु

तानि प्रतिसप्ताहं शोषयन्तु च ।

मशकजालस्य उपयोगं कुर्वन्तु ।

जलपूरिते गर्ते मृत्तैलेन सेचनं कुर्वन्तु ।

## वार्तालापार्थम् -

१. किम्, भवान् / भवती एतादृशं भित्तिपत्रकं कुत्रापि दृष्टवान् / दृष्टवती ?

२. अस्मिन् भित्तिपत्रके के के बिन्दवः महत्त्वपूर्णाः सन्ति ?

३. एतादृशानि भित्तिपत्रकाणि कः / का स्थापयति ?

४. वार्तापत्रेषु एतादृशानि भित्तिपत्रकाणि कः / का ददाति ?

५. भवतः / भवत्याः परिवेशे कति जनाः डेंगू-रोगेण पीडिताः आसन् ? अन्वेषणं कुर्वन्तु ।

६. मालिन्यकारणात् जायमानानां रोगाणां विषये चर्चां कुर्वन्तु ।

१. भित्तिचित्रकात् केचन शब्दाः प्रदत्ताः सन्ति –

| | | |
|---|---|---|
| मलेरिया | डेंगू | चिकनगुनिया |

एतानि कस्य नामानि सन्ति ? (✓) इति चिह्नं स्थापयतु -

- औषधानाम्
- मशकानाम्
- रोगाणाम्

२. अधः कानिचन चित्राणि दत्तानि सन्ति । एतेषु कुत्र कुत्र मशकाः अण्डानि स्थापयितुं शक्नुवन्ति ? प्रदत्ते कोष्ठके (✓) इति चिह्नं योजयतु -





पुष्पाधानी          शीतकम्



भग्नचक्रम्



पिहितानि पात्राणि



पादुका



जलपूरिताः उपानहः



रिक्ता कूपी



दोला

# भोजनं पेयं च

शरीरं स्वस्थं भवेत् तदर्थं सन्तुलिताहारः आवश्यकः भवति। सन्तुलिताहारः इत्युक्ते शरीरस्य कृते आवश्यकभूतानि तत्त्वानि। ऋतुफलानां शाकानां च सेवनेन शरीरं स्फूर्तियुक्तं तिष्ठति। गृञ्जनकं वर्तुलकं, रक्ताङ्गं वृन्ताकं च इत्यादिषु शाकेषु विभिन्नाः वर्णाः दृश्यन्ते, तथैव फलानि धान्यानि च अनेकवर्णयुतानि भवन्ति। वस्तुतः तेषाम् अनेकवर्णयुतानां मिश्रितखाद्यवस्तूनां सेवनं स्वास्थ्याय हितकारकं भवति।

अधः तिस्रः तालिकाः निर्मिताः सन्ति। तत्र एकस्यां तालिकायाम् ऋतु-नामानि (ग्रीष्मः, वर्षा, शिशिरः) सन्ति। ततः अग्रिमायां तालिकायाम् ऋतु-अनुगुणम् उपलभ्यमानानां फलानां शाकानां च नामानि प्रदत्तानि सन्ति। तासु एका तालिका रिक्ता अस्ति। तस्यां तालिकायाम् ऋतु-अनुगुणं यानि फलानि शाकादिकानि च भवन्तः / भवत्यः खादन्ति तेषां नामानि लिखन्तु।

| ऋतुनाम | शाकानि, अन्नानि फलानि च | भवन्तः / भवत्यः यत् खादन्ति। |
|---|---|---|
| ग्रीष्मः | कर्कटी, कालिङ्गम्, खर्बूजम्, सेवफलम्, आम्रम्, द्राक्षाफलम् | |
| वर्षा | भूचणकः, वज्रकम्, यवनालः, मकायः, मुद्गः, कदलीफलम् | |
| शिशिरः | चणकः, गोधूमः, वर्तुलकम्, मूलिका, वास्तुकम् | |

**वर्षाऋतौ भूचणकान् शरद्-ऋतौ गोधूमगुच्छान् हरितचणकान् च भर्जयित्वा सेवनम् अतीव रुचिकरं भवति।**

**आहारसम्बद्धाः केचन अनुसरणीयाः गृहोपचाराः -**

- कर्तनात् पूर्वं शाकानि प्रक्षालनीयानि, यतः कर्तनानन्तरं प्रक्षालनेन तेषां पोषकतत्त्वानि न्यूनानि भवन्ति।
- गुडं कलायं च मर्दयित्वा गुडपट्टिकायाः निर्माणं भवति।
- तिलं गुडं च मर्दयित्वा तिलस्य मोदकानि निर्माय भोक्तुं शक्यन्ते। शैत्यकाले अस्य सेवनम् आरोग्याय हितकरं भवति।
- अङ्कुरितानां चणकानां मुद्गानां च सेवनं स्वास्थ्यस्य कृते लाभाय भवति।
- किण्वसहितं चूर्णं पौष्टिकं भवति।

## अक्षराणि पठन्तु लिखन्तु च -

उ



उत्पीठिका



उपचारिका

उपचारिका उपचारं करोति ।

| | | | | |
|---|---|---|---|---|
| उपनेत्रम् | उद्योगः | उद्यानम् | उदरम् | उपचारः |
| उत्सवः | उलूखलम् | उन्नतः | उत्पीठिका | उज्जयिनी |
| उष्णीषम् | उच्चारणम् | उत्साहः | उपदेशः | उपत्यका |

उ

उ

## चित्रं दृष्ट्वा शब्दं लिखन्तु -





**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका सहभागिनां शब्दानां पठने साहाय्यं कुर्यात्, तेषां द्वारा अक्षराणि लेखयेत्। प्रदत्तस्थाने चित्रस्य नाम लेखयेत्।

## अक्षराणि पठन्तु लिखन्तु च -

ऊ



ऊर्णा

ऊर्णा-द्वारा उष्णवस्त्राणां निर्माणं भवति।

| | | | | |
|---|---|---|---|---|
| ऊर्णम् | ऊषरा | ऊर्णायुः | ऊषणम् | वधूः |
| ऊर्जा | ऊनपञ्चाशत् | ऊर्ध्वम् | ऊर्णनाभः | भूमिः |

## ■ पठन्तु लिखन्तु च -

# 39



**शिक्षक-निर्देशः –** शिक्षकः / शिक्षिका सहभागिद्वारा 'उ' 'ऊ' इति वर्णसंयुक्तस्य पदस्य वाक्यस्य च उच्चारणं वारं वारं कारयेत्।

■ अक्षराणि पठन्तु लिखन्तु च -



ह

होलिका पर्व वर्णमयं भवति ।

| | | | | |
|---|---|---|---|---|
| गृहम् | विवाहः | गृहिणी | सिंहः | हंसः |
| गुहा | हरिणः | घासहरः | हस्तः | हसनम् |
| हानिः | हलम् | जिह्वा | हस्ति | अल्पाहारः |
| हिमम् | हरितम् | हिङ्गुः | पिहितम् | ग्राहकः |
| गृहगोधिका | चिह्नम् | भारवाहकः | हसति | ब्रह्मा |

ह

ह

- **चित्राणि पश्यन्तु शब्दान् लिखन्तु च -**







## अक्षराणि पठन्तु लिखन्तु च -



पिच्छम्

छ



छत्रकः



छुरिका

| | | | | | |
|---|---|---|---|---|---|
| छत्रम् | छात्रः | छुरिका | छत्रकः | पिच्छम् | छदः |
| कच्छपः | गुच्छः | छात्रावासः | छद्म | प्रोञ्छः | छाया |
| छिद्रम् | छुछुन्दरः | स्वच्छता | पुच्छम् | आच्छादकम् | छविः |
| मूर्च्छा | छात्रवृत्तिः | छलम् | इच्छा | छायाचित्रम् | |

छ

छ

## चित्राणि पश्यन्तु शब्दान् लिखन्तु च -







## अक्षराणि पठन्तु लिखन्तु च -

थ



रथः

अश्वः रथं वहति ।

| | | | | |
|---|---|---|---|---|
| स्थालिका | पन्थाः | स्थूलः | सारथिः | रथः |
| ग्रन्थिः | स्थलम् | तीर्थम् | नाथनम् | तिथिः |
| स्थानम् | स्वास्थ्यम् | कथा | मन्थनम् | कथम् |
| सिक्थवर्तिका | | अस्थिपञ्जरम् | आरक्षकस्थानम् | |

थ

थ

# ■ चित्राणि पश्यन्तु शब्दान् लिखन्तु च -







## अक्षराणि पठन्तु लिखन्तु च -

फ



फलप्रिया शीतकं स्रावयति।

| | | | | | |
|---|---|---|---|---|---|
| फलम् | फेनकम् | फल्गुः | गुल्फः | द्विरेफः | कफः |
| शेफालिका | गुम्फनम् | तोयफला | फलाहारः | स्फुरणम् | स्फटिका |
| फलकम् | योगफलम् | गुणनफलम् | क्षेत्रफलम् | फणी | स्फोटकम् |

फ
फ

## चित्राणि पश्यन्तु शब्दान् लिखन्तु च -









**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका सहभागिद्वारा ‘फ’ इति वर्णयुक्तस्य पदस्य वाक्यस्य च उच्चारणं कारयेत्।

## अक्षराणि पठन्तु लिखन्तु च -

ठ



काष्ठकुट्टः चञ्च्वा प्रहारं करोति ।

| | | | | |
|---|---|---|---|---|
| ज्येष्ठः | अङ्गुष्ठः | कनिष्ठिका | कण्ठः | ओष्ठः |
| काष्ठफलकम् | उत्पीठिका | पाठशाला | निष्ठुरः | गोष्ठी |
| कण्ठी | कर्मठः | लेखनपीठम् | काष्ठम् | प्रतिष्ठा |

ठ

ठ

## चित्राणि पश्यन्तु शब्दान् लिखन्तु च -








## अक्षराणि पठन्तु लिखन्तु च -

ङ



बालः पर्यङ्के शयनं करोति

| | | | | |
|---|---|---|---|---|
| कङ्कणम् | कङ्कतम् | पर्यङ्कः | कङ्कालः | तुरङ्गः |
| किङ्किणी | अङ्गारः | पतङ्गः | अङ्गम् | अङ्कः |
| दिनाङ्कः | बङ्गप्रदेशः | कलिङ्गम् | अङ्कुरः | पङ्कः |
| पञ्चाङ्गम् | अङ्गुली | तरङ्गः | पङ्क्तिः | चित्रपतङ्गः |

3

3

## चित्राणि पश्यन्तु शब्दान् लिखन्तु च -







■ **अधः एकस्यां तालिकायां कानिचन पदानि प्रदत्तानि सन्ति । प्रत्येकं पदे प्रयुक्तानि अक्षराणि दृष्ट्वा क्रमशः रिक्तस्थानेषु निर्देशानुसारं पदानि लिखन्तु ।**

छत्रम् फलम् गृहम् कण्ठः स्थालिका ज्येष्ठः ऊर्णम् उल्लासः उपचारः
आकाङ्क्षा अङ्कुरः अङ्काः ऊनविंशतिः उर्वरा स्थितिः

| उ | ऊ | ह | छ | थ | फ | ठ | ङ |
|---|---|---|---|---|---|---|---|
| उल्लासः | ऊर्णम् | .......... | .......... | .......... | .......... | .......... | .......... |

## संयुक्ताक्षराणि

■ **केचन वर्णाः तादृशाः भवन्ति, येभ्यः अ/आ/इ/ई (ा / ा / ि / ी) इत्यादीनां स्वरवर्णानां निष्कासनेन स्वररहिताः भवन्ति । यथा-**

| | | | | | |
|---|---|---|---|---|---|
| च् + अ | च | - | च्यवनः | सच्चरित्रवान् | उच्चारणम् |
| न् + अ | न | - | अन्नम् | अन्यत्र | अनन्यः |
| प् + अ | प | - | स्थाप्यम् | पिप्पलः | विप्लवः |
| म् + अ | म | - | सम्पादनम् | परम्परा | भूकम्पः |
| ल् + अ | ल | - | मूल्यम् | कारवेल्लम् | उल्लासः |
| ज् + अ | ज | - | उज्ज्वलः | सज्जनः | लज्जा |
| त् + इ | ति | - | मतिः | गतिः | हस्ति |
| र् + ई | री | - | गौरी | चौरी | भेरी |

## ■ हलन्तशब्दानां निर्देशनार्थं (्) इति चिह्नस्य उपयोगः क्रियते यथा –

| | | | | | |
|---|---|---|---|---|---|
| स् + अ | स | - | विद्वस् | अदस् | वेधस् |
| द् + अ | द | - | युष्मद् | अस्मद् | भवद् |
| क् + अ | क | - | प्राक् | त्वक् | तादृक् |

## ■ (र) रेफस्य विभिन्नानि रूपाणि एवं भवन्ति –

**यथा –**

| | | | | | | |
|---|---|---|---|---|---|---|
| र् म (म् अ) | = | र्म | - | कर्म | धर्मः | हर्षः |
| ट् र् अ | = | ट्र/ढ्र | - | राष्ट्रम् | उष्ट्रः | मेढ्रः |
| क् र् अ | = | क्र | - | क्रोधः | क्रन्दनम् | क्रूरः |

**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका व्यञ्जनानां विषये प्रतिभागिनः बोधयेत्। अर्ध-अक्षरस्य लेखनस्य कः अभिप्रायः इति अस्मिन् विषये चर्चां कुर्यात्। रेफस्य प्रकारत्रयस्य अपि उच्चारणस्य लेखनस्य च भेदान् स्पष्टं कारयेत्।

## मम शब्दाः

**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका 'आहारः स्वास्थ्यं च' इत्यस्मिन् विषये चर्चां कुर्यात्। अस्मिन् विषये पाठकान् पृष्ट्वा लिखेत्। एते शब्दाः तेषां स्वमातृभाषायाम् अपि भवितुम् अर्हन्ति।

## ■ अवकराणां जीवनकालः

वयं यान् अवकरान् प्रसारयामः, तेषाम् अवकराणां नाशाय कति वर्षाणि अपेक्षितानि भवन्ति इति पश्यन्तु -




एते अवकराः शीघ्रं नष्टाः न भवन्ति, अवकराः अस्माकं परिसरात् संगृहीताः तु भवन्ति, किन्तु एतादृशाः अवकराः अक्ष्णः दूरं गच्छन्तः अपि एते प्रकृतिं क्षीणयन्ति एव इति उपरि प्रदत्तेन चित्रेण वयम् अवगन्तुं शक्नुमः। अस्य परिहारः अयमेव यत् अस्माकं परिवेशे न्यूनातिन्यूनः अवकरः भवेत् इत्येदर्थं सर्वेषां प्रयत्नः स्यात्।

## ■ उत्तरं यच्छन्तु -

प्रश्नः १. कानि-कानि वस्तूनि पञ्चाशद्-वर्षेभ्यः पूर्वमेव नष्टानि भवन्ति ?

प्रश्नः २. कानि-कानि वस्तूनि कदापि नष्टानि न भवन्ति ?

प्रश्नः ३. कानि-कानि वस्तूनि सर्वाधिक-न्यूनसमये नष्टानि भवन्ति ?

**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका सहभागिभिः सह कानि-कानि वस्तूनि अस्माकं पर्यावरणाय हानिकारकाणि भवन्ति इति अस्मिन् विषये चर्चां कुर्यात्। अवकराणां निदानार्थं तेषाम् अभिमतं किम् इत्यपि जानीयात्।

■ **स्वतन्त्रता-दिवसस्य अवसरे विद्यालये सर्वेभ्यः बालकेभ्यः मोदक-पेटिकायाः वितरणं सञ्जातम् । एकस्यां पेटिकायां केवलं चत्वारि मोदकानि स्थापयितुं शक्यन्ते । आयान्तु, अनुमानं कुर्मः यत् १० बालकेभ्यः मोदक-पेटिका दातव्या अस्ति, तर्हि कति मोदकानि अपेक्षितानि ?**

१ बालकाय  अर्थात् १ मोदक-पेटिका इत्युक्ते चत्वारि मोदकानि ।

१ वारम् ४

१ गुणितम् ४

अथवा १ × ४ = ४ मोदकानि ।

---

२ बालकाभ्यां  अर्थात् ४ मोदकानां २ द्वे मोदकपेटिके

४ + ४    (२ द्विवारम् ४)

२ गुणितानि ४

अथवा २ × ४ = ८ मोदकानि ।

---

३ बालकेभ्यः  अर्थात् ४ मोदकानां ३ मोदकपेटिकाः

४ + ४ + ४    (३ त्रिवारम् ४)

३ गुणितानि ४

३×४ = १२ मोदकानि ।

---

४ बालकेभ्यः  अर्थात् ४ मोदकानां ४ पेटिकाः

४+४+४+४    (४ चतुर्वारम् ४)

४ गुणितानि ४

४×४ = १६ मोदकानि ।

---

५ बालकेभ्यः  ४ मोदकानां ५ पेटिकाः

४+४+४+४+४ = ५ पञ्चवारम् ४

५ × ४ = २० मोदकानि ।

---

**शिक्षक-निर्देशः-** कस्यचित् अङ्कस्य अनेकवारं सङ्कलनस्य संक्षिप्तप्रक्रिया एव गुणनं (गुणः/घातः) इति भवति । शिक्षकः / शिक्षिका विविध-प्रसङ्गान् स्वीकृत्य कस्यचित् एकस्य अङ्कस्य गुणनार्थं सहभागिनः प्रेरयेत् ।

वदन्तु, ७ बालकेभ्यः कति मोदकानि प्राप्यन्ते ?

४ + ___ + ___ + ___ + ___ + ___ + ___ = ___ वारम् ___

अथवा ___ गुणितम् ___ = ___ × ___ = ___ मोदकानि।

१० बालकेभ्यः कति मोदकानि प्राप्यन्ते ?

४ + ___ + ___ + ___ + ___ + ___ + ___ + ___ + ___ + ___ = ___ वारम् ___ = ___ गुणितम् ___ = ___ × ___ = ___ मोदकानि।

- **परिसरात् सङ्गृहीतेभ्यः अवकरेभ्यः केषाञ्चन अवकराणां पुनरपि उपयोगः भवितुम् अर्हति, यथा- प्लास्टिक्, काचः, कर्गदम्। अस्मिन् कार्ये अवकरग्राहकस्य महती भूमिका भवति।**

मदनः गृहस्य स्वच्छतां कृतवान्, स्वच्छतानन्तरं संगृहीतस्य अवकरस्य विक्रयणं कृतवान्। अवकर-ग्राहकस्य मूल्यसूचीं दृष्ट्वा वदन्तु –

**अवकरस्य मूल्यसूची**

| वस्तूनि | मूल्यम् (प्रति-किलोग्रामपरिमितम्) |
|---|---|
| वार्तापत्रिका | ₹ १० |
| प्लास्टिक् | ₹ ८ |
| लौहम् | ₹ २० |
| पुस्तिका/पुस्तकम् | ₹ ८ |
| स्थूलकागदम्/स्थूलकागद-पेटिका | ₹ ५ |
| काचः | ₹ ४ |

- ८ किलोग्रामपरिमितस्य प्लास्टिक् इत्यस्य विक्रयणेन कति रूप्यकाणि दीयन्ते ?
- ७ किलोग्रामपरिमितस्य समाचारपत्रस्य विक्रयणेन कति रूप्यकाणि दीयन्ते ?
- अवकरविक्रयणस्य मूल्यसूची-मध्ये कस्य वस्तुनः मूल्यं न्यूनतमम् अस्ति ?

**शिक्षक-निर्देशः-** शिक्षकः / शिक्षिका विभिन्नप्रसङ्गे वस्तूनां क्रयणार्थं विक्रयणार्थं च मूल्यस्य निर्धारणार्थम् तत्सम्बद्धगुणनस्य तथ्यानां लेखनार्थं च प्रेरयेत्।

- **प्लास्टिकस्यूतानां प्रयोगः न्यूनः भवेत् इति एतदर्थं मालापुरग्रामस्य निवासिनः एवं निर्णयं स्वीकृतवन्तः यत् ते वस्तूनां क्रयणार्थं वस्त्रस्यूतानाम् एव प्रयोगं करिष्यन्ति इति। तदर्थं ते सम्पूर्णग्रामे वस्त्रस्यूतानां वितरणार्थं १००-१०० स्यूतानाम् एकां पोटलिकां निर्मितवन्तः।**

**आगच्छन्तु, स्यूतान् गणयामः -**

| | |
|---|---|
| १ पोटलिका १०० स्यूतानाम्  अथवा १ वारम् १०० अथवा | १×१००=१०० स्यूताः |
| २ पोटलिके १०० स्यूतानाम्  अथवा २ वारम् १०० अथवा | २×१००=२०० स्यूताः |
| ३ पोटलिकाः १०० स्यूतानाम्  अथवा ३ वारम् १०० अथवा | ३×१००=३०० स्यूताः |

| | |
|---|---|
|  | ४ × १०० = ४०० स्यूताः |
|  | ५ × १०० = ५०० स्यूताः |
|  | ६ × १०० = ६०० स्यूताः |
|  | ७ × १०० = ७०० स्यूताः |
|  | ८ × १०० = ८०० स्यूताः |
|  | ९ × १०० = ९०० स्यूताः |
|  | १० × १०० = १००० स्यूताः |

**शिक्षक-निर्देशः -** शिक्षकः / शिक्षिका प्रतिभागिनः शतात् ऊर्ध्व-सङ्ख्यानां परिचयं कारयेत् एवं च दीर्घसङ्ख्यानां सङ्ख्याः एककम्, दशकम्, शतकम् इति क्रमेण लेखनम् अवगमनं च कारयेत्। १००० तः ५००० पर्यन्तानां सङ्ख्यानां गुणनस्य अभ्यासम् अपि कारयेत्।

## मिलित्वा पठामः -

# गान्धिवर्यस्य आश्रमः

गान्धिवर्यः कतिपयवर्षपर्यन्तम् आश्रमस्य पाकशालायां प्रबन्धनकार्ये सहायतां कृतवान्। सः प्रातःकालिकीं प्रार्थनां समाप्य पाकशालां गत्वा शाकानि कर्तयति स्म। सः पाकशालायां भाण्डारगृहे वा कुत्रापि अवकरं लूताजालं वा पश्यति स्म तर्हि सः स्वसहभागिनः तर्जयति स्म। तस्य शाकानां, फलानां, धान्यानां पौष्टिकतत्त्वानां च सम्यक् ज्ञानम् आसीत्। एकदा कश्चित् आश्रमवासी प्रक्षालनं विना आलुकं कर्तितवान्। तदा गान्धिवर्यः तं बोधितवान् यत् आलुकं जम्बीरफलं च प्रक्षाल्य एव कर्तनीयम् इति।



एकदा गान्धिवर्यः कस्मैचित् आश्रमनिवासिने तादृशानि कदलीफलानि दत्तवान् येषु कृष्णबिन्दवः आसन्। तादृशानि कदलीफलानि प्राप्य तस्य मनसि अतीव दुःखम् अभवत्। तदा गान्धिवर्यः तम् उक्तवान् यत् एतेषां पाचनं शीघ्रं भवति, अत एव भवद्भ्यः विशेषेण दत्तवान्, यतो हि भवतः पाचनशक्तिः दुर्बला अस्ति।

गान्धिवर्यः प्रायः स्वयमेव आश्रमवासिभ्यः भोजनस्य परिवेषणकार्यं करोति स्म, अत एव ते स्वादहीनस्य क्वाथस्य अपि विरोधं कर्तुं न शक्नुवन्ति स्म। दक्षिण-अफ्रिकादेशस्य

कस्मिंश्चित् कारागारे सः प्रतिदिनं शतशः बन्धिभ्यः सायं प्रातः भोजन-परिवेषणकार्यम् अपि कृतवान्।

आश्रमस्य कश्चन नियमः आसीत् यत् सर्वैः अपि स्वभोजनपात्राणां प्रक्षालनं स्वयमेव करणीयम् इति। पाकशालायाः पात्राणि तु प्रायशः मिलित्वा प्रक्षालयन्ति स्म। एकस्मिन् दिने स्वयं गान्धिवर्यः बृहत्-घटानां प्रक्षालनकार्यं स्वीकृतवान्। यावत्पर्यन्तं पात्राणि न द्योतन्ते स्म तावत्पर्यन्तं गान्धिवर्यः सन्तुष्टः न भवति स्म। एकदा कारागारे कस्यचित् सहायकस्य कार्येण असन्तुष्टः सः उक्तवान् यत् सः स्वयमेव लोहपात्राणि अपि प्रक्षाल्य रजतवत् प्रकाशयितुं शक्नोति स्म।



*स्रोत— वसंत, कक्षा-6, रा.शै.अ.प्र.प.*

# टिप्पणी